# संस्कृतवार्ताः

# 23.04.2024

# सायम् - 06:20

<u>मुख्यवार्ता:</u>

· समस्ते देशे लोकसभा-निर्वाचनस्य द्वितीय-चरणस्य प्रचाराभियानं जवीयस्या गत्या प्रवर्तते। नेतार: जनान् स्वपक्षे लोभयितुं जनसभा: सन्ति सम्बोधयन्त:।

· उच्चशिक्षायां क्यू.एस. इति वैश्विक-मानांकने भारतस्य प्रदर्शनम् उत्सहवर्धकं इति ब्रूते प्रधानमन्त्री श्रीनरेन्द्रमोदी।

· नागरिकोड्डयन-महानिदेशालयेन विमानसेवा-विभाग: समादिष्ट: यत् एकस्यामेव पी.एन.आर. इति संख्यायां यात्रारता: न्यूनायुवर्गीया: बाला: निज-मातृपितृभ्याम् सह यात्रां कर्तुं निश्चप्रचम् अनुमता: भवेयु:।

· केन्द्रशासिते जम्मू कश्मीरे सर्वकारेण सर्वेभ्य: अधिकारिभ्य:, कर्मकरेभ्य: च डिजिटल इति अङ्कीय-हस्ताक्षर-प्रमाण-पत्रस्य उपयोग: अनिवार्यीकृत: ।

· यूरोपीय-देशानां संघेन वीजा इति पारगमनानुमति-पत्र-विषयम् अभिलक्ष्य नूतना: नियमा: सन्ति प्रख्यापिता: ।

· आईपीएल इति क्रिकेट-प्रतिस्पर्धा-मालिकायाम् अद्य चेन्नै-सुपर-किंग्स-दलस्य लखनऊ-सुपर-जायन्ट्स दलस्य च मध्ये भविष्यति संघट्ट:।

<u>प्रचाराभियानाम्</u>

लोकसभा-निर्वाचनस्य द्वितीय-चरणाय प्रचार-प्रसाभियानं द्रुतगत्या प्रवर्तते। मतदातॄन प्रभावयितुम् आक्रष्टुं च विविध-राजनैतिक दलानां शीर्षनेतार: सम्पूर्णे देशे नैका: जनसभा: सम्बोधयन्त: वर्तन्ते। अस्मै चरणाय मतदानं त्रयोदशराज्येषु केन्द्रशासितप्रदेशेष्वपि भविष्यति। भारतीय-तनता-पार्टीति-दलस्य वरिष्ठनेता केन्द्रीयमनत्री च अमितशाह: कांग्रेसनेतु: पी. चिदम्बरम् इत्येतस्य तद् व्यक्तव्यस्य आलोचनां कृतवान् यस्मिन् स: उक्तवान् यत् यदि इण्डी इति संयुतिदलं शासनारूढा भविष्यति तर्हि सी.ए.ए. इत्यस्य निरसनं भविष्यति। एकेन वार्ताभिकरणेन सह वार्तां कुर्वन् श्रीशाह: प्रख्यापितवान् यत् कांग्रेसदलेन निर्वाचन-विजयाय तुष्टिकरणस्य राजनीति: शस्त्रत्वेन योजिता। असौ आश्वासितवान् यत् एन.डी.ए. इति प्रशासनं

सर्वेषां न्यायाय प्रतिबद्धमस्ति। अपि च सी.ए.ए. इति अधिनियम: कदापि निरस्तीकृतो नैव भविष्यति।

## प्रधानमन्त्री-क्यूएस

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना उच्चशिक्षायां क्यू.एस. इति वैश्विक-मानांके भारतस्य प्रदर्शनम् उत्सहवर्धकं कथितम्। एकस्मिन् सामाजिक-सञ्चार-पटले श्रीमोदिना निगदितं यत् आगामि-भविष्ये गुणवत्तायुतायै शिक्षायै ध्यानप्रदानेन भारतस्य युवशक्ति: लाभान्विता भविष्यति। असौ अग्रे कथिवान् यत् प्रशासनं बृहत्तमे-चरणे अनुसन्धान-अधिगम-नवाचारेभ्य: अधिकं ध्यानं प्रददाति। एतदनन्तरं प्रधानमन्त्री क्यू.एस. इत्येतस्य मुख्यकार्यकारि-अधिकारिणा गुंजियो क्वाक्वेरेली इत्यनेन सह मेलन-मंत्रणां कृतवान्। श्रीक्वाक्वेरेली इत्येष: उद्घोषितवान् यत् आगामिषु केषुचित् सप्ताहेषु क्यू.एस. इति भारतीयोच्च -शिक्षा -व्यवस्थया सह विषयगत-अन्ताराष्ट्रिय-विश्वविद्यालयस्य नवीनतम-मानांकनस्य परिणामान् विनिमयीकरिष्यति।। असौ प्रख्यापितवान् यत् सर्वेषु जी.विंशति: राष्ट्रेषु अस्मिन् वर्षे भारतीय-विश्वविद्यालयै: स्वीयोच्च-प्रदर्शनेषु श्रेष्ठानि परिवर्तनानि नामांकितानि।

## प्रधानमन्त्री- हनुमान् जयन्ती

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना अद्य हनुमान् जन्मजयन्त्या: पावने अवसरे सर्वेभ्य: देशवासिभ्यो जनेभ्यः शुभकामना: प्रकटिता: सन्ति। सामाजिके सञ्जाले प्रेषिते सन्देशे श्रीमोदी भगवन्तं पवनपुत्रं हनुमन्तं स्मरन् प्रोदैरयत् यत् समस्तस्य देशस्य मदीय-परिवार-जनेभ्य: हनुमान् जन्मजयन्त्या: असीम शुभकामना: सन्तु। पवनपुत्रस्य समर्पण-भाव: समस्त रामभक्तानां कृते सदैव प्रेरणाशक्ति: भविष्यति। तस्य कृपया विकसित-भारतस्य संकल्प: अपि नवोर्जायुक्त: भवेत्, इत्येव मे कामनास्ति। जयतु बजरंगबली

## नागरिकोड्डुनिदेशालय:

नागरिकोड्डयन-महानिदेशालयेन विमानसेवा-विभाग: इदं सुनिश्चेतुं समादिष्ट: यत् एकस्यामेव पी.एन.आर. इति संख्यायां यात्रारता: द्वादश-वर्षात् न्यूनायुवर्गीया: बाला: स्वकीय-मातृपितृभ्याम् अभिभावकैश्च सह निर्दिष्टासने यात्रां कर्तुम् अनुमता: भवेयु:। निदेशालायानुसारि वैमानिक-यात्रासमये अनेकानि एतादृशानि प्रकरणानि सम्मुखम् आगतानि येषु द्वादश-वर्षात् अल्पायु-वर्गीयबाला: पी.एन.आर. इति संख्या-भिन्नत्वात् स्वीय-मातृ-पितृ-अभिभावकैश्च सह

एकस्मिन्नेवासने उपवेष्टुं समर्था: नैव जाता:। निदेशलायेन इदमपि प्रख्यापितं यत् प्रवर्तमान-विमान-यात्रा-परिपत्रं अनेनैव कारणेन सशोधितं जातम्।

## जम्मूकश्मीराङ्कीयहस्ताक्षरणि

केन्द्रशासिते प्रदेशे जम्मू कश्मीरे सर्वकारेण सर्वेभ्य: अधिकारिभ्य:, कर्मकरेभ्य: च डिजिटल इति अङ्कीय-हस्ताक्षरीय-प्रमाण-पत्रस्य उपयोग: अनिवार्यीकृत: अस्ति। एतत् सर्वं केन्द्र-सर्वकारस्य कार्मिक-लोक-परिदेवना-निवृत्त-निभृति-मन्त्रालयस्य प्राशासनिक परिष्कार-लेक-परिदेवना-विभागेन ई-कार्यालयस्य कार्यान्वयनस्य स्थिते: समीक्षायां विनिर्धारितम् अस्ति।

## जम्मू-कश्मीर-गृहत: मतदानम्

जम्मू-कश्मीरे समावेशितापूर्णं जनसहभागितायुक्तं च निर्वाचनं कारयितुं ह्य: सांबा जनपदस्य त्रिषु निर्वाचन-क्षेत्त्रेषु रामगढे, सांबायां, रामगढे च वरिष्ठ-नागरिकेभ्य:, अशक्तेभ्य:, दिव्यांगजनेभ्यश्च गृहत: एव मतदानम् आयोजितम्। ए.वी.एस.सी. इति सौविध्यान्तर्गतं चतुर्दशाधिक-पञ्च-शत-मितेभ्य: मतदातृभ्य: गृहेषु एव मतदानस्य सुविधा प्रदानार्थं सौविध्य-दलानां घटनं कृतम् आसीत्। तत्र जनपदे पञ्चाशीति: वर्ष-त: अधिक-वयोमितै: जनैः विकलांग-जनैः च सहितेषु चतुर्दशाधिक-पञ्च-शत-मितेषु मतदातृषु अष्ट-नवत्युत्तर-चतुश्शत मतदातृभिः गृहत: मतदानस्य प्रथमे दिने एव ए. वी. इति वैकल्पिक-गृह-मतदानस्य सुविधाया: माध्यमेन निज-मताधिकारस्य प्रयोग: कृत: । एतेन पदक्षेपेण समावेशितां सुलभ-नैर्वाचनिक-प्रक्रियां च सुनिश्चयन-पूर्वकं जनानां लोकतान्त्रिक-सहभागिता-संवर्धनस्य दिशायाम् एकार्यं महत्वपूर्णां प्रगतिं चिह्नी-कृतमस्ति।

## यूरोपीयसंघपारगमनानुमतिपत्रकनियम:

यूरोपीय-देशानां संघेन वीजा इति पारगमनानुमति-पत्र-विषयम् अभिलक्ष्य नूतना: नियमा: प्रख्यापिता: सन्ति। येन भारताद् वारम्वारं तत्र यात्रा-कर्तार: जना: सुदीर्घ-अवधि-पूर्वक बहुप्रवेश-पारगमनानुमति-पत्रकाय अपि आवेदनं कुर्तुम् अर्हिष्यन्ति। अनेन निर्णयेन यूरोपस्य एकोन-त्रिंशत् देशानां यात्रा अतिशय-सरला भविष्यति। एतद् विषये यूरोपीय संघस्य प्रतिनिधि-मण्डलेन ह्य: नूतना:नियमा: घोषिता: सन्ति। अनया घोषणया भारताद् यूरोपस्य नियमित-यात्रिणां कृते नूतन-

नियमस्य व्यवस्थाया: अन्तर्गतं वीजा इति पारगमनानुमति-पत्रकस्य प्राप्ति: सरला भविष्यति। प्रतिनिधिमण्डलेन प्रोक्तं यत् विगत-वर्ष-त्रये वारद्वयं वीजा पत्र-प्राप्तेरनन्तरं वैधरीत्या तस्य उपयोगानन्तरं भारतीय-नागरिकेभ्य: अतोऽपि वर्ष-द्वयस्य दीर्घकालिक-बहुप्रवेशानुमति-पत्रकं प्रदास्यते। अनेन भारतीय-यात्रिण: पुन:पुन: वीजा-पत्र-प्रक्रिया-पूरणत: सुरक्षिता: लाभान्विता: च भविष्यन्ति।

<u>जम्मू कश्मीर</u>

समस्ते देशे लोकसभा निर्वाचनानि निध्याय वातावरणम् उष्णीकृतम् अस्ति। अत्रान्तरे देशस्य कतिपय-भूभागेषु पोस्टल बैलट इति मतपत्रीयप्रक्रियाद्वारा मतदानस्य कार्यं प्रारब्धम् अस्ति। अस्मिन्नेव प्रसङ्गे नैर्वाचनिक-समरे समर्हणीय-मतदातृणां योग्यतां सुनिश्चेतुम् आवश्यक-सेवासु ए. वी. ई. एस्. इति श्रेण्याम् अनुपस्थित-मत-दातृणां अन्तर्गतं डाक-मतदान-केन्द्रेषु-मतपत्रीय-मतदान पुनरीक्षणं ह्य: साम्बा-जनपदस्य विजयपुर-सांबा-रामगढ़ चेति त्रिषु क्षेत्रेषु साफल्येन समनुष्ठितम्। अस्माकं वार्ताहरो सूचयति यत् विभिन्न-विभागानां षट्-त्रिंशदधिक-एकशत-मितै: जनैः मत-पत्रीय-मतदानस्य लाभः अभिस्वीकृत:। ध्येयमस्ति यत् जम्मू-कश्मीरे अतः पूर्वमपि पोस्टल बैलट इति मत-पत्रीय-माध्यमेन जनैः नैजम् मतदानं कृतमस्ति। अस्मिन्नेव प्रसङ्गे जम्मू-कश्मीरस्य डोडा क्षेत्रे पोस्टल बैलट इति मत-पत्र-माध्यमेन दिव्यांग-जनैः वरिष्ठ नागरिकैश्च नैजं बहुमूल्यं मतदानं लोकतंत्रस्य यज्ञे समर्पितम्। अस्मिन् अवसरे निर्वाचनाधिकारिण: तत्रत्येषु दूरस्थ-क्षेत्रेषु पर्वतीय-स्थलेषु च दिव्यांग-जनानां वरिष्ठ-नागरिकानां च सहयोगार्थं मतदानस्य सौविध्यं प्रदातुं यन्त्रसहितं तेषां तेषां गृहाणि एव प्राप्तवन्त: आसन्।

<u>जम्मू-कश्मीर हत्या</u>

केन्द्रशासिते राज्ये जम्मू कश्मीरे राजौरी जनपदस्य शाहदरा-शरीफ-मध्ये अज्ञातै: भुशुण्डिका-धारिभि: एकस्य सौन्यभटस्य भ्रातु: गोलिका प्रहारेण हत्या कृता अस्ति। अस्माकीनो वार्ताहरो वर्णयति यत् संदिग्धेन आतंकवादिना कुण्डा-ग्रामे सैन्यभटस्य एकस्य भ्ज्ञावासे गोलिका प्रहारा: कृता:। यस्मिन् गोलिका-प्रहार-काण्डे तस्य भ्राता व्रणीभूत:। भसौ त्वरितमेव समीपस्ये चिकित्सालये उपचारार्थं सन्नीत: यत्र चिकित्सकै: स: मृत: घोषित: ध्येयमस्ति यत् मृतक: तत्रैव राज्यस्य समाजकल्याण विभागे कार्यरत: आसीत। भारक्षि-बलस्य सैन्यबलस्य च संयुक्त-समूहेन आक्रमणकारिण: निगडनार्थं क्षेत्रस्य परिधीकरण-पूर्वकम् अन्वेषणाभियानम् आरब्धम् अस्ति।

चीन-उइगर

अमेरिका देशेन प्रख्यापितस्य एकस्य विवरणस्य अनुसारेण चीन-देशस्य अधिकारिभि: सप्तदशोत्तर-द्वि-सहस्र-तम-वर्षात् त्रयोविंशत्युत्तर-द्वि-सहस्र-तम-वर्ष यावत् पञ्च-वर्षावधौ दश-लक्षतोऽधिका: उइगर समुदायस्य अन्य अल्पसंख्याक-समुदायस्य च निगडीकृता: सन्ति। विवरणे प्रोदितम् अस्ति यत् अल्पसंख्याक-समुदायस्य जनान् विरुध्य मानवीयापराधेन समं नरसंहारश्चापि कृत: अस्ति चीनेन।

आई.पी.एल.

आईपीएल इति इंडियन प्रीमियर लीग इत्याख्यायां क्रिकेट-प्रतिस्पर्धा-मालिकायाम् अद्य चेन्नैनगरस्य एम.ए. चिदम्बरम-क्रीडांगणे चेन्नै-सुपर-किंग्स-दलस्य लखनऊ-सुपर-जायन्ट्स दलस्य च मध्ये स्पर्धा भविष्यति। यस्या: प्रतिस्पर्धाया: प्रसारणं सायंकाले सार्ध सप्त-वादनत: समारप्स्यते। ह्य: गत-स्पर्धायां जयपुरस्य सवाई-मानसिंह-क्रीडांगणे राजस्थान-रॉयल्स-दलेन मुम्बई-इण्डियन्स-दलं नवक्रीडकै: पराजितम्।

।। इति वार्ता: ।।